वेदकः-दिका, वेदकः-दिका, विवेदिषकः-विविदिषकः-[विवित्सकः]-षिका, वेविदकः-दिका;

वेदिता, [वेत्ता]-त्री, वेदयिता-त्री, विवेदिषिता-विविदिषिता-त्री, विवित्सिता-त्री, वेविदिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि **किलतिवत्** (193) ज्ञेयानि। शतरि [1]विन्दः[A], [2]गोविन्दः-कुविन्दः, [B]अरविन्दम्[3], [4]वित्तम्-[धनम्], विन्नं [लब्धम्], [5]परिवेत्ता, विविद्वान्[6]-विविदिवान्, [7]वेदना[C]

---

1. 'अनुपसर्गाल्लिम्पविन्द—' (3-1-138) इति शप्रत्यये मुचादित्वात् '**शे मुचादीनाम्**' (7-1-59) इति नुमि शपि पररूपे च रूपमेवम्।
2. 'गवादिषु **विन्देः** संज्ञायाम्' (वा. 3-1-138) इति शः। गां विन्दतीति **गोविन्दः**। एवं कुविन्दः इति **प्रक्रियासर्वस्वे**।
3. **अरविन्दम्**-चक्रस्य नाभिनेम्योरन्तरालकाष्ठानि अराः, तत्सदृशानि दलानि विन्दति—लभत इत्यर्थः। **भाष्ये तु अरविन्दः** पुंलिङ्गत्वेन पठ्यते। '**कर्मण्यण्**' (3-2-1) बाधनाय इदम् इति **बृ. शेखरे**।
4. '**वित्तो** भोगप्रत्यययोः' (8-2-58) इति क्तप्रत्यये भोगे चाभिधेये तत्वाभावो निपात्यते। **वित्तो**ऽयं मनुष्यः। प्रतीत इत्यर्थः। **वित्तम्** धनम्, **वित्तं** प्रसिद्धम्, भुज्यत इति **भोगो** धनम्। प्रतीयत इति **प्रत्ययः** प्रसिद्धम्। अन्यत्र **विन्नम्**।
5. तृजन्तोऽप्ययं 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ' (द. उ. 2-1) इति संज्ञायां गम्यमानायामनिटौ भवतः। '**परिवेत्ता**ऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात्' **इत्यमरः**। ज्येष्ठे विवाहरहिते कृतदारपरिग्रहः कनिष्ठः **परिवेत्ता** इत्युच्यते। क्वसुप्रत्यये 'विभाषा गमहन**विद्**—' (7-2-68) इतीड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः। तेन निष्ठानत्वपक्षे, नत्वाभावपक्षेऽपीण्निषेधो नित्य इत्यवधेयम्। **कातन्त्रे** तु अनिट्त्वेनास्य धातोः पाठात् तेषां मते निष्ठायामिण्निषेधः सिद्ध एव। **भाष्यादिषु तु** धातुरयं सेडित्येव सम्मतः। विस्तरस्तु **माधवीये** द्रष्टव्यः।
6. 'विभाषा गमहन**विद्**विशाम्' (7-2-68) इति क्वसौ विकल्पेन इडागमो भवति। तेन रूपद्वयम्। विशिना साहचर्यादिह **विदे**स्तौदादिकस्य लाभार्थस्य ग्रहणम्।
7. ण्यन्तात् 'घट्टिवन्दि**विदि**भ्यश्च' (3-3-107) इति युचि रूपमेवम्।

A. 'आर्चीद् द्विजातीन् **परमार्थविन्दा**नुदेजयान् भूतगणान् न्यषेधीत्।'
भ. का. 1-15.

B. 'प्रजा इवाङ्गाद**रविन्द**नाभेः शंभोर्जटाजूटतटादिवापः।' शि. व. 3-65

C. 'युक्त्वा योगं स्थितः शैले विद्गुण्वन् चित्त**वेदनाम्**॥' भ. का. 7-73